योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ५८

अष्टपञ्चाशः सर्गः ५८

श्रीवसिष्ठ उवाच ।

अत्रैव वस्तुन्युदिता श्रृणु राघव पूर्वजाः ।

कचेन गाथा या गीता बार्हस्पत्येन पावनाः ।। १

कस्मिंश्चिन्मेरुगहनेऽतिष्ठन्सुरगुरोः सुतः ।

कदाचिदभ्यासवशाद्विश्रान्तिं प्राप चात्मनि ।।२

सम्यग्ज्ञानामृतापूर्णा मतिर्नारमतास्य सा ।

पञ्चभूतमयेऽमान्ये दृश्येऽस्मिन्पेलवात्मनि ।। ३

स तेन निर्विण्ण इव सदात्मत्वादृते पदम् ।

अपश्यन्समुवाचेदमेको गद्गदया गिरा ।। ४

किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम्।

आत्मना पूरितं विश्वं महाकल्पाम्बुना यथा ।। ५

दुःखमात्मा सुखं चैव खमाशासुमहत्तया ।

सर्वमात्ममयं ज्ञातं नष्टकष्टोऽहमात्मना ।। ६

सबाह्याभ्यन्तरे देहे अधश्चोर्ध्वं च दिक्षु च ।

इत आत्मा ततश्चात्मा नास्त्यनात्ममयं क्वचित् ।। ७

सर्वत्रैव स्थितो ह्यात्मा सर्वमात्ममयं स्थितम् ।

सर्वमेवेदमात्मैवमात्मन्येव भवाम्यहम् ।। ८

यन्नाम नाम तत्किंचित्सर्वमेवाहमान्तरः ।θ

आपूरितापारनभाः सर्वत्र सन्मयः स्थितः ।। ९

पूर्णस्तिष्ठामि मोदात्मा सुखमेकार्णवोपमः ।

इत्येवं भावयंस्तत्र कनकाचलकुञ्जके ।। १०

उच्चारयन्नोङ्कारं च घण्टास्वनमिव क्रमात् ।

ओंकारस्य कलामात्रं पाश्चात्यं वालकोमलम् ।

नान्तरस्थो न बाह्यस्थो भावयन्परमे हृदि ।। ११

व्यपगतकलनाकलङ्कशुद्धो

हृदयनिरन्तरलीनवातवृत्तिः ।

गतघनशरदाशयोपमानः

स्थित इति राम कचः स गायमानः ।। १२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो० स्थितिप्रकरणे कचगाथानामाष्टपञ्चाशः सर्गः ।। ५८ ।।